दिनाङ्क :-05.10.2024

प्रात: - 06:55

अथ वार्ताः

हरियाण-विधानसभा

अद्य भविष्यमाणाय हरियाणा-विधानसभा-निर्वाचनाय सर्वा: व्यवस्था: सम्पादिता:। नवति: विधानसभाक्षेत्रेभ्य: मतदानं सुनिश्चितमस्ति। मतदानप्रक्रिया अद्य प्रात: सप्तवादनत: सायं षड्वादनपर्यन्तं समनुष्ठास्यते। अस्मिन् नैर्वाचनिक-रणे एकत्रिंशदधिकैकसहस्रं प्रत्याशिनां नियतिनिर्णयं भविष्यति। सुचारुरीत्या मतदानप्रक्रियां विधातुं द्वात्रिंशदधिक-षड्शतोत्तर-विंशतिसहस्रं मतदान-केन्द्राणि स्थापितानि सन्ति। जम्मूकश्मीररस्य त्रिचरणात्मकी हरियाणायाश्च एकचरणात्मिकी मतगणना मासस्यास्य अष्टमे दिनांके निर्धारितास्ति।

प्रधानमंत्री-महाराष्ट्र

प्रधानमन्त्री नरेन्द्रमोदी अद्य महाराष्ट्रस्य एकदिवसीय यात्रायां भविष्यति। प्रधानमन्त्री स्वीय यत्रावधौ वाशिमनगरे प्रायः त्रिशतोत्तर-त्रयोविंशतिसहस्र कोटिरूप्यकाणां कृषिपशुपालनक्षेत्रसम्बद्धानां विविधानाम् उपक्रमाणाम् शुभारम्भं करिष्यति। सः बञ्जारा-विरासत-सङ्ग्रहालयस्य उद्घाटनं अपि करिष्यति । पश्चात् श्रीमोदी ठाणे इत्यत्र अष्टशतोत्तर-द्वात्रिंशत्-सहस्र-कोटिरूप्यकाणां विविधविकासपरियोजनानाम् उद्घाटनं शिलान्यासं च करिष्यति। वाशिममण्डले प्रधानमन्त्री-किसानसम्माननिधि (पीएम-किसान) योजनायाः अष्टादशतमं पुटकम् उद्घाटयिष्यति । अस्मिन् कार्यक्रमे देशस्य नव दशमलव चत्वारि कोटितोप्यधिकाः कृषकाः प्रत्यक्षवित्तीयलाभान् प्राप्नुयुः, यस्य मूल्यं विंशति-सहस्रकोटिरूप्यकाणि अस्ति, अस्मिन् अवसरे सः नमो-शेतकरी-

महासम्माननिधियोजनायाः पञ्चमं देय मूल्येन महाराष्ट्रस्य कृषकाणां कृते प्रायः द्विसहस्रकोटिरूप्यकाणां अतिरिक्तलाभं अपि विमोचयिष्यति।

<u>पीएम-सेमिकण्डक्टर्</u>

भारतस्य पञ्च सेमिकण्डक्टर् इत्येतानि-संयंत्राणी शीघ्रमेव देशस्य विभिन्नेषु भागेषु स्थाप्यन्ते, तथा च 'मेड् इन् इण्डिया' चिप्स् इति इमानि विश्वस्य कृते सुलभानि भविष्यन्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। नवदिल्ल्याम कौटिल्य-आर्थिक-सम्मेलनम् अभिसंबोधयन् प्रधानमन्त्री अवदत् यत्, भारतं चल-दूरवाण्याः आयातकार्यात् उत्पादकत्वं प्रति अगच्छत् इति। भारते प्रत्येकस्मिन् क्षेत्रे निवेशस्य पर्याप्ता: अवसरा: सन्ति इति सः अवधानं दत्तवान्।

<u>राजनाथसिंह:-एसआईडीएम</u>

रक्षामन्त्री राजनाथसिंह: ह्य: उक्तवान् यत् निवर्तमान सत्रेऽस्मिन् गृहगत-रक्षोत्पादनम् सप्तविंशतिसहस्राधिक-एकलक्षकोटिरुप्यकाणां कीर्तिमदपि उल्लङ्घितवत्। रक्षामन्त्री नवदिल्ल्यां एस आई डी एम इत्युक्ते भारतीय-रक्षोत्पादनसंघस्य सप्तमं वार्षिकोपवेशनम् सम्बोधयन् अग्रे उक्तवान् यत् प्रशासनेन रक्षाक्षेत्रे अत्याधुनिक-प्रौद्योगिक्या: विकासाय नैका: योजना: सन्ति समारब्धा:। श्रीसिंहेन आई-डेक्स इत्यनेन सह प्रौद्योगिकी-विकासकोष: अदिति योजना इत्यादीनां विषयेऽपि निगदितम् ।

<u>जयशङ्करः- एस्. सि. ओ. शिखरसम्मेलनम्</u>

विदेशमन्त्री डा. एस्. जयशङ्करः अक्टोबर् मासस्य पंचदश षोडश दिनांकयो: आयोक्षयमाणे एस्. सि. ओ. इत्यस्मिन् शिखरसम्मेलने भागं ग्रहीतुं भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति। मन्त्रालयस्य प्रवक्ता रणधीर् जायसवालः नवदिल्ल्यां वार्ताहार-सम्मेलनस्य माध्यमेन पुष्टिम् अकरोत्।

ज़ाकीर् नायक् इत्यस्य पाकिस्तान्-देशयात्रायाः विषये श्रीजायसवाल: अवदत् यत्, भारतीयन्यायात् पलायितस्य पाकिस्तानदेशे उच्चस्तरीयं स्वागतम् अभवत् इति भारते न आश्चर्यम् अस्ति इति।

## महिला क्रिकेट टी20- विश्वकप

दुबय्यां महिलानां आई.सी.सी. विंशति-प्रति विंशति: प्रतिस्पर्धायां न्यूजीलैंडदलेन भारतं अष्टपञ्चाशत् धावनांकै: पराजितम्। तदनु रविवासरे भारत-पाकिस्तान-दलयोर्मध्ये द्वन्द्वं निश्चितमस्ति।